रुद्राणी स्त्री रुद्रस्य पत्नी रुद्र+ङीष् आनुक् च । शिव-पत्न्याम् दुर्गायाम् अमरः ।

रुद्रारि पु० रुद्रः अरिर्यस्य । कामदेवे । [च ।

रुद्रावास पु० ६त० । १कैलासे २काशग्रामे काशीक्षे० ३श्मशाने

रुध कामे दि०आ०सक०अनिट् प्रायेणानुपूर्वः । अनुरुध्यते अन्वरुद्ध । [अरुधत् अरौत्सीत्

रुध आवरणे रु० उभ०द्वि० अनिट् । रुणद्धि रुन्धे इरित्

रुधिर न० रुध-किरच् । शरीरस्थे रसपाकजन्ये १धातुभेदे २कुङ्कुमे अमरः । ३मङ्गलग्रहे ४रक्तवर्णे च पु० मेदि० ५तद्वर्णवति त्रि० । ६मणिभेदे न० । तदुत्पत्त्यादि यथा "हुतभुग्रूपमादाय दानवस्य यथेप्सितम् । नर्मदायां निचिक्षेप किञ्चिद्दीनादि भूतले । तत्रेन्द्रगोपकलितं शुकरक्तवर्णं संस्थानतः प्रकटपीलुसमानमात्रम् । नानाप्रकारविहितं रुधिराख्यरत्नमुद्भूत्य तस्य खलु सर्वसमानमेव । मध्येन्दुपाण्डुरमतीव विशुद्धवर्णं तच्चेन्द्रनीलसदृशं पटलं तले स्यात् । ऐश्वर्यभृत्यजननं कथितं तदेव पक्वञ्च तत् किल भवेत् सुरवज्रवर्णम्" गरु०पु०७८अ० ।

रुप आकुलीकरणे दि०पर० सक० सेट् । रुप्यति इरित् अरुपत् अरोपीत् ।

रुमण्वत् पु० लवण+अस्त्यर्थे मतुप् मस्य वः आसिन्दीवानित्यादिना नि० । लवणाकरे पर्वतभेदे सि०कौ० ।

रुमा स्त्री रु-मक् । १सुग्रीववानरभार्यायाम् २लवणस्थाने देशभेदे च मेदि० ।

रुरु पु० रु-क्रु । मृगभेदे अमरः ।

रुरु पु० रु-कु । १एरण्डवृक्षे रत्नमा० । स्वार्थे क । रक्तैरण्डे पु० राजनि० रु-उकक् । रुरुकोऽप्यत्र ।

रुश हिंसायां तु०पर०सक०अनिट् । रुशति अरुक्षत् ।

रुष वधे भ्वा०पर०सक०सेट् । रोषति अरोषीत् ।

रुष क्रोधे दि०पर०अक०सेट् । रुष्यति इरित् अरुषत् अरोषीत्

रुष क्रोधे चु०उभ०अक०सेट् । रोषयति ते अरूरुषत् त ।

रुष्(षा) स्त्री रुष-सम्प० क्विप् वा टाप् । क्रोधे हेमच० ।

रुषित त्रि० रुष-क्त वा इट् । क्रोधयुक्ते इडभावपक्षे रुष्टोऽप्यत्र । [रोहः रुहः ।

रुह उद्भवे भ्वा०पर०अक०अनिट् । रोहति अरुक्षत् । ज्वला०

रुह त्रि० रुह-क । १जाते २दूर्वायां स्त्री अमरः उत्तरपदस्थः तत्प्रादुर्भूते त्रि० यथा भूरुहः वारिरुहम् ।

रूक्ष पारुष्ये कठोरतायाम् निःस्नेहे च अद० चु०उभ०अक० सेट् । रूक्षयति ते अरुरूक्षत् त ।

रूक्ष त्रि० रूक्ष-अच् । १अचिक्कणे २स्नेहशून्ये च ३वृक्षे पु० हेमच० ४दन्तीवृक्षे स्त्री राजनि० ।

रूक्षगन्ध पु० रूक्षो गन्धो यस्य । गुग्गुलौ राजनि० ।

रूक्षदर्भ पु० । नित्यकर्म० । हरिदर्भे कुशभेदे राजनि० ।

रूक्षपत्र पु० रूक्षं पत्रमस्य । शाखोटवृक्षे राजनि० ।

रूक्षप्रिय पु० रूक्षं प्रीणाति प्री-क । कृष्णभौषधे राजनि० ।

रूढ़ त्रि० रुह-क्त । १जाते, २प्रसिद्धे च मेदि० । रूढ़िरस्त्यस्य अच् । प्रकृतिप्रत्ययार्थमनपेक्ष्य समुदायशक्त्यार्थबोधके ३शब्दे । यथा घटः गौरित्यादि । शब्द्य० प्र०

रूढ़ि स्त्री रुह-क्तिन् । १जन्मनि, २प्रसिद्धौ, प्रकृतिप्रत्ययार्थमनपेक्ष्य शब्देन समुदायशक्त्यार्थस्य ३बोधने ४शब्दशक्तिभेदे च "शब्दात्मिका सती रूढ़िर्भवेद्योगापहारिणी । कल्पनीया तु लभते नात्मानं योगबाधतः" कुमारभट्टः । लब्धात्मिका क्लृप्ता शक्तिर्योगबाधिका, कल्पनीया तु योगबाध्या" इत्यर्थः ।

रूप रूपान्वितकरणे चुरा० उभ० सक० सेट् । रूपयति ते अरुरूपत् त । नि+प्रमाणोपन्यासेन स्वरूपादिकथने ।

रूप न० रूप-क भावे अच् वा ।१स्वभावे, २सौन्दर्ये, ३पशौ, ४नाम्नि, ५शब्दे, ६ग्रन्थावृत्तौ, ७दृश्यकाव्ये नाटकादौ ८श्लोके ९आकारे च मेदि० । शब्दधातूनां विभक्तियोगेन १०निष्पन्नशब्दे, ११शुक्लादिवर्णे च १२तद्वति त्रि० । उत्तरपदस्थः सदृशार्थे त्रि० यथा पितृरूपस्तनयः मातृरूपा कन्या । १३एकसंख्यान्विते न० "रूपं भजेत् स्यात् परिपूर्त्तिकालः" लीलावती । "एकाव्यक्तं शोधयेदन्यपक्षात् रूपाण्यन्यस्येतरस्माच्च पक्षादिति" वीजगणितोक्ते १४अव्यक्तराशिसहचरितव्यक्तसंख्यान्विते च । आकारवर्णरूपस्य षोडश भेदाः तत्र परिमाणकृता रूपाकारस्य ह्रस्वदीर्घचतुरस्रवृत्तेति पञ्च भेदाः । वर्णस्य शुक्लकृष्णनीलारुणरक्तपीतेति पञ्च भेदाः स्पर्शकृता आकारभेदाः कठिनचिक्कणश्लक्ष्णपिच्छिलमृदुदारुणेति पञ्च भेदाः इति षोडशविधा भा० शा० उक्ताः । वैशेषिकनये "चक्षुर्मात्रग्राह्यं तवेद्रूपं द्रव्यादेरुपलम्भकम् । चक्षुषः सहकारि स्यात् शुक्लादिकमनेकधा" भाषा० । तच्च उद्भूतानुद्भूतभेदेन द्विविधम् "उद्भूतरूपं नयनस्य गोचरः" भाषोक्तेः उद्भूतरूपस्यैव प्रत्यक्षविषयता न परमाणुगतानुद्भूतस्य । तच्च पृथिव्यप्तेजसां गुणः "रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्" भाषा०उक्तेः । सौन्दर्यं रूपलावण्यसुज्ज्वलमणिनोक्तं यथा "अङ्गान्यभूषितान्येव केनचित् भूषणा-